# Kailaseshvarapradoshapujavarnanam 3

# કૈલાસેશ્વરપ્રદોષપૂજાવર્ણનમ્ ૩

## Document Information

Text title : Kailaseshvarapradoshapujavarnanam 3

File name : kailAseshvarapradoShapUjAvarNanam3.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 13 - kailAseshvarapradoShapUjAvarNanam | 33-107||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસેશ્વરપ્રદોષપૂજાવર્ણનમ્ ૩

(દેવ્યાપ્રતિ ઈશ્વરપ્રોક્તં કૈલાસેશ્વરપ્રદોષપૂજાકથનમ્ ૩)

ઈશ્વરઃ -

કુમ્ભૈરમ્ભોધરાચ્છચ્છવિજિતધવલૈઃ પૂરિતૈઃ ક્ષીરવાર્દ્ધૌ
પર્વોદ્યચ્છશિસન્નિભૈસ્સ્ફટિકજૈઃ કોટ્યાવધીસઙ્ખ્યયા ।
તત્ક્ષીરોત્તમમણ્ડસારસુભગૈસ્સિઞ્ચામિ લિઙ્ગે મમ
કૈલાસેશ્વરનામકે જનિજરારોગાપહે શઙ્કરિ ॥ ૩૩॥

આનીતં મમ તત્પયોમ્બુધિભવં વીરૈર્ગણેન્દ્રૈશ્શિવે
સદ્વૃત્તામલધારયા જનિમુમે તુષ્ટઃ પ્રદોષેષ્વહમ્ ।
કષ્ટાનિ પ્રસભં હારામિ સુકૃતાં રાશિન્દિશામિ ક્ષણા-
ત્સિઞ્ચન્લિઙ્ગસુપૂજકાય ગિરિજે તસ્માદહં પૂજયે ॥ ૩૪॥

દદ્ધ્યમ્ભોનિધિસમ્ભવૈર્નિબિડિતં તત્ખણ્ડમણ્ડં દધિ
પ્રોદ્યડ્ડિણ્ડિમમણ્ડલાભમગજે દત્વા સ્વલિઙ્ગોત્તમે ।
ગોદોહપ્રથિતે પ્રદોષસમયે સન્દારિતાઘૌઘકે
કાર્યં પૂજનમેતદેવ સમયે સર્વૈસ્સુરૈરપ્યહમ્ ॥ ૩૫॥

તલ્લિઙ્ગં પરિપૂજયામિ વસુધાધૃગ્ધુર્યમૌલૌ નિશ-
ઞ્ચોત્તુઙ્ગામલરત્નકુમ્ભવિલસત્પ્રાજ્યાજ્યધારાદિભિઃ ।
સ્વાજ્યામ્ભોધિસમાહૃતૈર્મમ ગણૈસ્સઙ્ખ્યાતિગં તદ્ઘૃતં-
તત્રાજ્યામલગન્ધસારસુભગા ગન્ધીકૃતાસ્તાદિશઃ ॥ ૩૬॥

સિઞ્ચામિ પ્રભસં સુગોઘૃતઘનૈઃ કૈલાસલિઙ્ગં મમ
મધ્વમ્ભોધિસમાહૃતૈર્મણિઘટૈર્માધ્વીકસારં મધુ ।
ગર્ભોદ્યન્મણિસારકાન્તિસુભગૈર્ગોમેદકાચ્છપ્રભૈ-
સ્સિઞ્ચામ્યદ્રિવરાત્મજે સુમધુરાધારેયગર્ભં મધુ ॥ ૩૭॥

ધારાકારમદીયલિઙ્ગશિરસિ હર્ષેણ પશ્યામ્બિકે

શૈલોદ્દામશિખાનિભાશ્શિખરિતાદુત્તુઙ્ગસારોપમાઃ ।
પ્રાલેયાચલમૌલિસારસુભગાશ્ચાપાણ્ડુરાશ્શર્કરા
દત્વા તન્મમ લિઙ્ગમૌલિવિલસચ્ચન્દ્રાંશુધારા સમમ્ ॥ ૩૮॥

હર્ષાપ્લાવિહૃદન્તરઃ પ્રતિદિનં હૃષ્યામિ પશ્યાદ્રિજે
કુલ્યાસ્તત્ર મનોરમાદ્રિતનયે નારેલનીલોદ્ભવાઃ ।
તાભિસ્સમ્ભૃતસદ્ઘટાદિવિતતૈર્લક્ષૈઃ પ્રવાહાકુલા
તલ્લિઙ્ગાસેકનીરૈઃ પ્રવહતિ મધુજા દેવગઙ્ગેતિ નામ્ના ॥ ૩૯॥

સર્વે વિષ્ણુપિતામહેન્દ્રવરુણાશ્ચાનન્દભક્ત્યા વૃતા-
સ્તીર્થં તીર્થપરમ્પરૈકફલદં જ્ઞાત્વાનુભૂયાપિ તે ।
સેવન્તે સતતં નિતાન્તમગજે જેતું પુનસ્સંસૃતિં-
તુઙ્ગાઘૌઘતરઙ્ગભઙ્ગસુભગાસ્તસ્યાન્તરાસ્તે સુરાઃ ॥ ૪૦॥

સપ્તછદાચ્છફલશૈલવરોડદ્રિકન્યે કૂપ્મો મયા સુગુરુપીતતરશ્ચ મેરોઃ ।
તજ્જૈસ્ત્વગારરહિતૈશ્શશિખણ્ડમૌલિલિઙ્ગાર્ચનસ્ય ફલમેવ જનુર્ભવાનિ ॥ ૪૧॥

ઉત્તુઙ્ગસાલસુરસાલરસાલસારૈર્નિષ્ટપ્તહેમઝરિસોદરગર્ભજાતૈઃ ।
તલ્લિઙ્ગસેચનમુમે સુઘટૈઃ કરોમિ પુંસામપિ પ્રમથનાથપદં દદાતિ ॥ ૪૨॥

દેવિ સ્ત્રીકુચસન્નિકાશલિકુચાપારપ્રભાગન્ધજ-
સ્ફારાસારમહારસાદિકલશૈસ્સંસેચયામ્યમ્બિકે ।
કૈલાસાચલલિઙ્ગમૌલિવિલસલિઙ્ગૈકસદ્ભૂષણં
લિઙ્ગન્ત્વેતદપારગન્ધલુલિતૈર્નીરૈશ્ચ ગન્ધોદકૈઃ ॥ ૪૩॥

ઇક્ષુસાગરમહોર્મિભિરીશે લિઙ્ગમૌલિરિયમેવ વિશિષ્ટા ।
સિક્તયે ઘટસહસ્રસુધારા કારિતા ગિરિસુતે કમનીયા ॥ ૪૪॥

કોશૈઃ કાનનસમ્ભવૈર્મધુઝરીસારાતિસારસ્સ્ફુટં
નિર્યત્પીતતરાતિકાન્તિનિવહૈર્ગન્ધીકૃતાશામુખૈઃ ।
તત્કોશામલરાશિભિર્ગિરિસુતે સઞ્છન્નમૈશં શિરઃ
પશ્યામિ પ્રથિતેક્ષણઃ પૂકટિતે પુણ્યે પ્રદોષે મમ ॥ ૪૫॥

કસ્તૂરીઘનસારકુઙ્કુમમહાપાટીરસારૈર્ઘટૈ-
શ્ચન્દ્રાસારવિલોલિતામ્બુઘટિતૈસ્સત્પાટલામોદિતૈઃ ।
શ્રાન્તા મે ગણપુઙ્ગવાશ્ચ નિતરાં પુણ્યે પ્રદોષે મમ
સ્વાદૂદામલનીલધારિતઘટોદ્ગ્રાહે પરં શૈલજે ॥ ૪૬॥

શઙ્ખાનાઞ્ચ સહસ્રકૈર્મણિચિતૈર્ગોશૃઙ્ગધારાદિભિઃ
ક્ષીરાજ્યાદિમધુપ્રવાહજલધિપ્લુષ્ટૈશ્ચ તૈલૈરપિ ।
તદ્ગન્ધોત્તમપિષ્ટલેપનગતશ્રીચિક્કણાઘર્ષણૈ-
શ્શ્રીપત્રૈર્મૃદુસારસૂક્ષ્મતૃણકૈરુત્પઞ્ચગવ્યૈરપિ ॥ ૪૭॥

સૌવર્ણોત્તમકુમ્ભસમ્ભવમહાધારાસહસ્રૈશ્શતૈ-
રર્ઘ્યૈ રત્નસુવર્ણકલ્પિતકુશાગ્રામ્બૂદ્ભવૈસ્તજ્જલૈઃ ।
અષ્ટાઙ્ગાર્ઘ્યકકલ્પિતૈસ્સુમધુરૈર્ગર્ભામ્બુકુમ્ભૈશ્શિવે
સંસિચ્યાખિલમિન્દુકુન્દજમહાપાટીરસત્પાટલાઃ ॥ ૪૮॥

મોદોત્થામ્બુદસન્નિભૈશ્ચ કલશૈસ્તૌર્યત્રિકોદ્ભાવનૈ-
ર્ધૂપૈશ્ચાપિ મહામધૂત્થમધુપર્કાસારપારૈરપિ ।
પ્રદોષસમયે મયા શરદુદીચરાકાશશિ
પ્રકાશચયસૌહદૈર્વિર(મ)લકુડ્મલૈરન્ધસામ્ ॥ ૪૯॥

મદીયરજતાચલપ્રકટશઙ્ગિભારાશિભિ-
સ્સુધાકરકલાલસલ્લલિતલિઙ્ગમૌલ્પર્પિતૈઃ ।
વેદાશ્ચત્વાર એતે પ્રથિતતમયશસ્સ્તોમધારાનુરાગા-
સ્સ્વાદૂદામલનીરસેચનવિધૌ શાખાશિખાભિઃ ક્રમાત્ ॥ ૫૦॥

રુદ્રાણાં સ્તવનેન મામપિ શિવે સન્તોષયન્તસ્સ્થિતા
મૂર્તાસ્તે વિહિતાગ્રપઙ્કજકરા વિશ્વાસભૂતા મમ ॥ ૫૧॥

ઘનરસમૃગનાભિસારધારામૃગમદપટલીપટીરચન્દ્રગન્ધૈઃ ।
પરિવીતં ભુજગેશસન્નિવીતં પ્રભયા કોટિશશાઙ્કસૂર્યતુલ્યમ્ ॥ ૫૨॥

ગોત્રાધિરાજતનયે વિનયેન પશ્ય સમ્પશ્યદાત્મગતિસૌખ્યદમેકભાસ્વત્ ।
ઘુમુઘુમિતસુગન્ધગન્ધિતાશામુખમુખરૈઃ પરિલિપ્ય લિઙ્ગમેતત્ ॥ ૫૩॥

પરિહૃષ્ટો નિતરાં ભવામિ ગૌરિ ત્રિદશાલભ્યસુગન્ધયક્ષકર્દમૈઃ ।
મણિજાલાતતરત્નકૂલચિત્રૈઃ પરિધાયામલસ્વર્ણસદ્દુકૂલૈઃ ॥ ૫૪॥

શિવલિઙ્ગં મમ શૈલરાજકન્યે પરિપશ્યામિ સુગન્ધિગન્ધવસ્ત્રૈઃ ।
બ્રહ્માણ્ડગોલકમુમે પ્રભયા ન તુલ્યં મલ્લિઙ્ગગોલકવરોત્તમરત્નધારા ॥ ૫૫॥

સાવધૂતશશિમૌલિકલાલલામન્તદ્રત્નમૌલ્યકલને ન વિધિર્ન વિષ્ણુઃ ।
યક્ષાધિપોઽપ્યગસુતેઽથ વિકુણ્ઠિતાક્ષઃ કેઽન્યે ક્ષમા વદ સમાનહૃદા નિરીક્ષ્ય ॥ ૫૬॥

યદ્દર્શનેન સમદુઃખવિરામણં સ્યાદ્યદ્રત્નવર્યનિચયૈર્મુકુટાતિશોભમ્ ।

પૂરિતાખિલજનાજનિકામં વામદેવમિહ પશ્ય સુકામમ્ ॥ ૫૭॥

ફણામણિ સહસ્રકૈર્વિધૃતવક્ત્રમુક્તાફલૈઃ
પ્રભાતતસભાવલી મણિગણાત્તકાન્ત્યા યુતમ્ ।
ત્રિપુણ્ડ્રનિટિલોલ્લસત્તિલકિતાચ્છસદ્ધીરકં
પ્રપશ્ય ગિરિકન્યકે વિમલમૌલિલિઙ્ગં મમ ॥ ૫૮॥

સહસ્રમુખસત્ફણિપ્રવરમૌલિમાણિક્યસ-
દ્દ્યુતીવિજિતકાન્તિતો મમ સ્વભોગસંવેષ્ટિતૈઃ ।
ફણાછવિકૃતામ્બરછવિજિતાયસચ્છત્રકં
શિવે શિરસિ મે સદા દધતિ લિઙ્ગમોલૌ મમ ॥ ૫૯॥

વિશ્વેશ્વરાખ્યવરલિઙ્ગસમાનમાનમાનન્દસૌખ્યદમિદં મમ સુપ્રિયેયત્ ।
હન્તું સમગ્રજનપાતકરાશિમેવ સર્વાર્થરાશિદમિદં પરિપૂજયામિ ॥ ૬૦॥

નાનામણિદ્યુતિસરાવલિભૂષિતન્તન્મલ્લિઙ્ગમેવ કમલાચ્છદૃશા પ્રપશ્ય ।
પુણ્યે પ્રદોષસમયે મુદિતસ્ત્વયાઽહં તલ્લિઙ્ગમધ્યભવને મહિમાસ્થિતોઽહમ્ ॥ ૬૧॥

વિકસિતસિતપદ્મરત્નકઞ્જમાલાનવનીલોત્પલજૈસ્સહસ્રમાલિકાભિઃ ।
મધુબન્ધુરગન્ધદિવ્યગન્ધૈસ્સિતમન્દારજરક્તમાલિકાભિઃ ॥ ૬૨॥

દિનાન્તસમયોલ્લસન્મધુરગન્ધજાતીસરૈ-
ર્વસન્તકલિકાસ્ફુરન્મધુરગન્ધમલ્લીસરૈઃ ।
વિકુણ્ઠિતમિદં મમ પ્રકટસોમધામપ્રભા-
સમુત્થમગકન્યકે વિમલદ્રોણમાલાયુતમ્ ॥ ૬૩॥

કદમ્બવનનીપજસ્ફુરદપારમાલાભરૈ-
ર્વિલોલવરપીઠગં પ્રકટમૌલિલિઙ્ગં શિવે ।
પ્રપશ્ય નયનાઞ્ચલૈર્વિકચમઞ્જરીકપ્રભૈઃ
પ્રદોષસમયેઽમ્બિકે નયનજન્મનસ્તત્ફલમ્ ॥ ૬૪॥

તદ્બિલ્વરત્નકમલૈરમલૈર્ભવાનિ પુન્નાગનાગનવચમ્પકદૂર્વયાપિ ।
નીલોત્પલૈર્દમનકૈઃ કરવીરજાતિદ્રોણાર્કકાશજવકૈઃ કનકૈસ્સમર્ચ્ય ॥ ૬૫॥

સત્પુણ્ડરીકવકુલૈર્ધવકર્ણિકારમાલૂરકુન્દકુસુમૈરતિહર્ષતોઽહમ્ ।
રાજીવામલમલ્લિકાસુમસરસ્ફારોત્થગન્ધાન્ધકૈ-
ર્લોલમ્બૈર્વિકસત્સુમોત્થમધુપૈઃ પશ્યામ્બિકે પૂજિતમ્ ।
એતલ્લિઙ્ગવરં પ્રદોષસમયે બિલ્વીદલોત્તંસકં

ધુત્તૂરેણ હિ શોભતેઽધ નિતરાં મૌલિસ્થચન્દ્રાધિકમ્ ॥ ૬૬॥

અગરુતરુજાતધૂપધૂમૈર્બહુલામોદવિકાસિદિક્સમૂહૈઃ ।
મરુદાકુલલમ્બિતોરુધારાવિકસત્સ્વર્ગપથાઃ પ્રચારજાલૈઃ ॥ ૬૭॥

સુવર્ણમણિભાજને શિશુનભોઘદમ્ભોજિની-
પ્રિયાંશુચયસઙ્ક્રમિપ્રકટદાક્ષ્યરત્નાંશુભિઃ ।
મનોરથપથાતિગૈર્મમ સુલિઙ્ગમાલાયિતૈ-
સ્સુપાણ્ડરશશિપ્રભૈર્હિમતુષારકુન્દપ્રભૈઃ ॥ ૬૮॥

સુચન્દ્રવરખણ્ડકૈર્વિરચિતોરુદીપાવલી-
સુગોઘૃતસુવર્તિકોજ્વલસુદીપજાલૈરપિ ।
ગૃહાઙ્ગણતમસ્તતિપ્રવિદદારદ્ત્યાદરૈ-
રખણ્ડતરમણ્ડનૈઃ પ્રથિતપદ્મહંસોપમૈઃ ॥ ૬૯॥

સુતારકગણાવલીલલિતમુક્તજાલપ્રભૈ-
ર્વિલોકય ગિરીન્દ્રજે મમ સુમૌલિભાસઙ્કુરૈઃ ।
નાનાભક્ષ્યમહાદ્રિગન્ધસુરસાશ્ચમોદિતાસ્તાદિશ-
સ્સુખાગન્નજરાશિભિશ્ચ ઘૃતજૈસ્સૂપપ્રવાહૈશ્શિવે ॥ ૭૦॥

શાકૈશ્શૈલનિભૈર્મધુપ્રમથિતૈઃ ક્ષીરાદિદધ્યોદનૈઃ
પ્રાલેયાચલસન્નિભૈસ્સુગુડકૈર્નૈવેદિતૈશ્શઙ્કરિ ।
નારિકેલલિકુચૈસ્સુકપિત્થૈર્માતુલિઙ્ગકદલીસુરસાલૈઃ ॥ ૭૧॥

ખર્જૂરૈર્બદરીસુગન્ધજરસૈડિમ્બનારઙ્ગકૈઃ
કઙ્કોલામલકૈસ્સુરાદનફલૈ રાજાદનૈર્જાતિકૈઃ ।
નૈવેદ્યેક્ષુજકાણ્ડકૈર્ગિરિવરાજ્જાતે મુદે મે ભવે-
ત્તામ્બૂલૈઃ ખદિરૈર્લવઙ્ગમુખરૈર્જાતીફલૈલાયુતૈઃ ॥ ૭૨॥

મુક્તાચૂર્ણસુપૂર્ણપૂગમધુરૈઃ કર્પૂરસંવાસિતૈ-
રુત્ફુલ્લામલનાગવલ્લિજદલૈઃ પ્રોદ્યદ્ગિરીન્દ્રપ્રભૈઃ ।
નૈવેદ્યં પરિકલ્પયામિ ગિરિજે તસ્મિન્પ્રદોષે હ્યહં
વીણાનિક્વણમઞ્જુમઞ્જુલસુધાધારાસમૈર્ગાયનૈઃ ॥ ૭૩॥

મન્નામામૃતમીશ્વરેશ્વરિ મુદા રુદ્રાણિભિઃ કલ્પિતં
શમ્ભો શઙ્કર ધૂર્જટે ત્રિણયન કાલાન્ધકારે હર ।
પાહીશ પ્રમથાધિનાથ મહિમન્લિઙ્ગાકૃતે પાહિનો

રત્નૈઃ કલ્પિતમદ્દલધ્વનિયુતૈશ્શઙ્ખોત્થનાદૈશ્શિવે ॥ ૭૪॥

પ્રોદ્યત્કાહલનિસ્વનૈર્મધુરિતં તન્મડ્ડુડિણ્ડીરવૈઃ ॥ ૭૫॥

દુન્દુભ્યાઘાતનાદૈર્મમ ગણવરગાસ્યોરુનિશ્વાસરાગૈ-
ર્વેણૂરન્ધ્રનિષેવણાઙ્ગુલિભવૈસ્તાલૈશ્ચ સજ્ઝલ્લરૈઃ ।
તુષ્ટોઽહં પ્રથિતે પ્રદોષસમયે તલ્લિઙ્ગસેકાદરો
નાન્યત્કિઞ્ચિદવેદિષં ત્રિજગતાં વ્યાપારમપ્યદ્રિજે ॥ ૭૬॥

રઙ્ગે તુઙ્ગતરઙ્ગભઙ્ગચપલૈર્નૃત્યૈર્મહામદ્દલૈ-
ર્વીણાવેણુનિનાદસામ્યલયતો નૃત્યન્તિ લિઙ્ગાગ્રતઃ ।
રુદ્રાણીગણકોટયોઽત્ર સુભગે મઞ્જીરશિઞ્જસ્વનૈ-
શ્શમ્ભો શઙ્કર સામ્બ પાહિ શિવ નસ્તૂર્ણં પ્રસાદઙ્કુરુ ॥ ૭૭॥

ઇત્યેવં સુભગા વિલાસમધુરા હાવૈશ્ચ ભાવૈરપિ
ચોત્કાન્તાવૃતરત્નકાન્તિવિલસત્પૂર્ણેન્દુસામ્યાનના ।
કુમ્ભોદ્યત્કરિકુમ્ભસન્નિભકુચાઃ કાઞ્ચીઝણન્નિસ્વના-
સ્તાલોત્થાહતિપાદપદ્મજરવૈઃ કુર્વન્તિ વિદ્યુદ્ધ્વનિમ્ ॥ ૭૮॥

ગણેશકરભાસ્વતા વિવિધલોકસામ્રાજ્યધુ-
ગ્વિવિક્તકૃતલાઞ્છનૈશ્શશિસુવૃત્તમુક્તાતતૈઃ ।
મહોડુગણમૌક્તિકપ્રકટતારપઙ્ક્તીતતૈ-
ર્ગિરીન્દ્રતનયે ધૃતાન્યમિતછત્રકોટ્યો ગણૈઃ ॥ ૭૯॥

પરટારમણોત્થકામિતાઙ્ગોત્થિતપક્ષાહનનાભચામરૌઘૈઃ ।
ગણબૃન્દૈરખિલૈશ્ચ સેવ્યમાનં મમ લિઙ્ગાલયધૂનનૈશ્શિવેઽદ્ય ॥ ૮૦॥

પ્રવાલમયદણ્ડિના મલયશૈલભૂમારુત-
સુપોતતરવાયુના નગવરારિપાણીજુષા ।
જયેન ચમરીમૃગપ્રચલવાલગુચ્છાત્મના
સુખી જિતમુમે તદા મમ સુલિઙ્ગમત્યાદરાત્ ॥ ૮૧॥

ધૃતૈઃ પ્રમદપાણિભિર્વનકલાપિપુચ્છોચ્ચયૈઃ
કૃતૈર્વ્યજનકોટિભિર્હરિતચન્દ્રકોટ્યંશુભિઃ ।
મદીયમણિમણ્ડપં હરિમણીભિરાકલ્પિત-
મિવાદ્ય ગિરિજે તદા પ્રથિતભાભિરાદીપિતમ્ ॥ ૮૨॥

પ્રમથપ્રકરોર્ધ્વહસ્તસંસ્થૈર્મણિવર્યૈર્વિવિધૈસ્સરાગ્રલમ્બૈઃ ।

બિલસન્નવરત્નગુચ્છસચ્છૈર્ધુવદીશાનવરાગ્રગાઃ પતાકાઃ ॥ ૮૩॥

લિઙ્ગપ્રક્રમણૈરહં સ ઇતિ તલ્લિઙ્ગપ્રણામાદર-
સ્સ્વાત્માનં પરિચિન્તયામિ ગિરિજેઽપ્યાનન્દધારાવૃતઃ ।
પ્ર(વૃ)ત્યુત્થાખિલલોકજાલમખિલં મત્તો ન ભિનં ક્વચિ-
ત્કિઞ્ચિચાપિ શિવે મમૈવ મનસસ્સઙ્કલ્પજાલં જગત્ ॥ ૮૪॥

મય્યેવાગસુતે લયં પ્રયાતિ નિખિલઞ્ચૈકોઽદ્વયોઽહં સદા
નાનેતિ પ્રસભં વદન્તિ નિગમા વાચાં મનોદૂરગમ્ ।
અન્યાનન્દ સમં (અન્યાનન્દમુમે) મદીયમમલં જાનન્તિ નો યોગિનો
નો વેદા યતયસ્સુરાસુરગણા વિષ્ણાદયોઽપ્યબ્જજાઃ ॥ ૮૫॥

જ્ઞાનં જ્ઞેયમિદં જગદ્ગતમુમે જ્ઞાતા ન કિઞ્ચિત્સ્થિતિ-
ર્ભૂમાહં સુખધામકો હિ મહતાં હ્રસ્વો ન ચાણુસ્સ્થિરઃ ।
સ્વાત્માનન્દમુમે મમાલ્પકમિદં લિઙ્ગેઽપ્યલિઙ્ગોઽસ્મ્યહં
ચા(આ)કાશાદિવિદૂરગસ્થિતિલયોત્પત્તિષ્વસઙ્ગોઽસ્મ્યહમ્ ॥ ૮૬॥

ઇત્યેવં પરમાર્થતસ્ત્રિભુવને તિષ્ઠામિ વિશ્વાતિગો
ગોપ્યમ્મદ્ધૃદયં ગિરીન્દ્રતનયે તુભ્યમ્મયા દર્શિતમ્ ।
ઇત્યુક્ત્વા પરમેશ્વરસ્ત્રિજગતાં નાથોઽપિ વિશ્વાકૃતિ-
ર્દૃષ્ટ્વા લિઙ્ગમપારબિલ્વકુસુમૈસ્સમ્પૂજિતં મસ્તકે ॥ ૮૭॥

દૃષ્ટ્વા તામગજાં નનર્તપરમાનન્દપ્રસાદૈકભૂઃ
કૈલાસાચલમૌલિમણ્ડપવરે તલ્લિઙ્ગસાન્નિધ્યકે ।
અણ્ડખણ્ડનમહાઘનઘોષશ્ચણ્ડતાણ્ડવલલદ્ભ્રિધિમુણ્ડઃ ।
કુણ્ડલીશકૃતકુણ્ડલગણ્ડસ્તણ્ડુમડ્ડુનિનદોત્થલયાઙ્ઘ્રિઃ ॥ ૮૮॥

નન્દિભૃઙ્ગિકૃતડિણ્ડિમનાદૈર્મણ્ડિતો હિ શિવયા સ હિ રઙ્ગઃ ।
ઢુણ્ઢિરાજકૃતશઙ્ખનિનાદૈસ્તુણ્ડષટ્કકૃતતૂર્યનિનાદૈઃ ॥ ૮૯॥

જટાચ્છટવિઘર્ષિતાઃ પરિપતન્તિ તારાગણા
વમન્તિ રુધિરમ્મુખૈર્ભુવનનાગનાગા નગાઃ ।
જગન્નટનસમ્ભ્રમાદ્ભવતિ હેલયાન્દોલિતં
હરીન્દ્રવિધયસ્સુરા મુનિજનાસ્સકમ્પાઙ્ગકાઃ ॥ ૯૦॥

અષ્ટાવક્ત્રસુગીતસામમુરજોચ્ચણ્ડપ્રચણ્ડોલ્લસ-
ડ્ડિણ્ડીમધ્વનિમડ્ડુમદ્દલમહાસામાષ્ટદંષ્ટ્રારવૈઃ ।

ભ્રાજત્પદ્મજમુણ્ડષણ્ડજમહામાલાલસદ્વક્ષસં
લીલાચાલિતહસ્તકઙ્કણમહાનાગોર્ધ્વમૌલીલસત્ ॥ ૯૧॥

રત્નાપ્લાવિતકાન્તિરઞ્જિતદૃશં નૃત્યન્તમૈક્ષચ્છિવા
ચોદ્યદ્ભાનુમરીચિસન્નિભજટાસામ્રાજ્યપટ્ટાયિતા ।
લોલન્નીલસુરત્નપઙ્કજલસદ્ગઙ્ગાતરઙ્ગોત્થિતા
પારાવારસુધાઘનોત્થનટનાટોપા ફણીમઞ્જુલમ્ ॥ ૯૨॥

આનમ્રાખિલલોકજાલમુમયા સદ્રત્નરઙ્ગાન્તરે
નૃત્યન્તં દદૃશુસ્સરુદ્રગણપાઃ કૈલાસમૌલિસ્થિતમ્ ।
ઝલઞ્ઝલિતકઙ્કણં પદવલત્ક્વણન્નૂપુરં
કિણીકિણિતસધ્વનિં સ્ફટિકરત્નસન્મેખલમ્ ॥ ૯૩॥

ઘુણઙ્ઘુણકૃતારવં પદગરત્નમઞ્જીરકં
ચટચ્ચટરવોત્થિતપ્રપદપદ્મઘોષં શિવમ્ ॥ ૯૪॥

તૌર્યત્રિકોત્થિતમહારવજાતઘોષલોકત્રયોદ્ધતસુરાસુરકિન્નરેડ્યમ્ ।
મન્દસ્મિતાખિલવિમોહનવેષભૂષં રાજચ્છશાઙ્કમહસા ધવલીકૃતાશમ્ ॥ ૯૫॥

તં નીલલોહિતમુમા જગદાદિહેતું નૃત્યન્તમિષ્ટદમુપૈતિ ચ તુષ્ટચ(વ)ક્રમ્ ।
અષ્ટાકૃતિં નિખિલકષ્ટહરં પ્રદોષેઽપશ્યચ્છિવા સકરુણારસસારદૃષ્ટ્યા ॥ ૯૬॥

તાં વીક્ષ્યાગસુતાં સ્મયન્નિવ મહાદેવસ્સકૈલાસભૂ-
કૈલાસેશ્વરપૂજયા સરસયા કષ્ટાનિ સઞ્જહિવાન્ ।
લોકાનાં ગણપાત્મનામથ ઉમાં પ્રાહ પ્રસન્નાનનઃ
પશ્યામ્બેતિ વદન્ત્સદાશિવતરોર્મુગ્ધેન્દુચૂડશ્શિવઃ ॥ ૯૭॥

ઈશ્વર ઉવાચ -
કૈલાસેશ્વરલિઙ્ગમેતદમલં મુક્તિપ્રદં શાશ્વત-
ઞ્ચાપાતાલનિમગ્નમૂલમસકૃત્સમ્પૂજિતં તન્મયા ।
તસ્યોર્ધ્વામલમૌલિરપ્યગસુતે જાનન્તિ નૈવાગમા
દેવાદ્યૈર્મુનિભિસ્ત્વયાપિ ચ મયા કો વાસ્તિ તત્પૂજકઃ ॥ ૯૮॥

પૂજાપૂજકપૂજ્યશબ્દરહિતં તત્કેવલોઽહં શિવઃ
તલ્લિઙ્ગં વરદં સદાશિવમયં મચ્છૈલરાજે શિવે ।
(તલ્લિઙ્ગં ચ સદા ચકાસ્તિ(ગિરિજે)મચ્છૈલવર્યેઽમ્બિકે ।)
તદ્દર્શનાર્થં મુનયસ્સુરાસુરાસ્તપ્યન્તિ ચાદ્યાપિ જગત્યવિપ્લવાઃ (હરાજવિષ્ણવઃ) ॥ ૯૯॥

દેવ્યુવાચ -
ત્વયાપિ ન જ્ઞાયત ઇત્યહો મે સાશ્ચર્યમુક્તં હિ ત્વયા સદાશિવ ।
તવાપિ તત્કિં કૃતલિઙ્ગપૂજયા રહસ્યમેતન્મમ તદ્વદ પ્રભો ॥ ૧૦૦॥

ઇત્યુક્તં ગિરિજામનોહરવચશ્શ્રુત્વા મહસ્યામ્બિકાં
લોકં સ્રષ્ટુમથાત્તિ પાતિ સુતરાન્તત્પાલકશ્શઙ્કરઃ ।
વાચા ચન્દનશીતયા સુખકરશ્શીતાંશુધારી શિવઃ
પ્રાહોત્ફુલ્લમનોહરાબ્જવદનો દેવીં તદા ભૂતપઃ ॥ ૧૦૧॥

ઈશ્વર ઉવાચ -
નકર્મણા નૈવ સમાધિભિર્જપૈસ્તપસ્યયા વા વિવિધૈશ્ચ યજ્ઞૈઃ ।
વ્રતૈશ્ચ દાનૈર્નિયમૈર્મમેશ્વરિ પ્રાપ્નોતિ કિમ્મત્પદપૂજનં વિના ॥ ૧૦૨॥

તસ્માદહં લિઙ્ગવરં સદા મુદા સમ્પૂજયામીષ્ટદમેવ લોકાન્ ।
સંશિક્ષિતું કાર્યમિદં વિમુક્ત્યૈ સર્વાર્થદઞ્ચેતિ મતમ્મુદે મમ ॥ ૧૦૩॥

ધ્યાયામિ તદ્વેદશિરોઽધિગમ્યમોઙ્કારગમ્યં પરમાર્થતત્વમ્ ।
સત્યં શિવં જ્ઞાનસુખં સુબોધન્નિર્દ્વન્દ્વમદ્વૈતમનન્તરૂપમ્ ॥ ૧૦૪॥

એકં સ્થિરં શાશ્વતમવ્યયં તત્પ્રાક્સૃષ્ટિતો વિશ્વમિદન્ન યત્ર ।
સંવીક્ષિતં તત્પુનરુદ્બભૂવ તદેવ જાયે હૃદિ ભાવયામિ ॥ ૧૦૫॥

યસ્માત્પરન્નાપરમસ્તિ કિઞ્ચિત્ યસ્માગરીયો (યસ્માદણીયઃ) ન હિ કિઞ્ચિદસ્તિ ।
યેનૈવ પૂર્ણં પરિદૃશ્યમાનં વિશ્વન્તદેવાદ્ય વિભાવયામિ ॥ ૧૦૬॥

ઇત્યુક્ત્વા ગિરિજાં મહાશિવતરોદ્ધ્યાયન્ભવસ્સ્થાણુવ-
ન્નિર્વ્યાપારતરઙ્ગસાગર ઇવાપ્ય(ત્ય)ક્ષુબ્ધ(ક્ષુદ્ર)ગાત્રશ્શિવઃ ।
દેવીચાપિ મુમોદ હર્ષભરિતા(ઽઽ)નન્દાઙ્ગકાસ્તે ગણાઃ
ચેત્થં તસ્ય (ઇત્યેસ્તસ્ય) સુપૂજનં મુનિવરાસ્સત્યં વદામિ સ્ફુટમ્ ॥ ૧૦૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસેશ્વરપ્રદોષપૂજાવર્ણને
દેવ્યાપ્રતિ ઈશ્વરપ્રોક્તં કૈલાસેશ્વરપ્રદોષપૂજાકથનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૧૩ - કૈલાસેશ્વરપ્રદોષપૂજાવર્ણનમ્ । ૩૩-૧૦૭॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 13 - kailAseshvarapradoShapUjAvarNanam . 33-107..

Notes:

Śiva શિવ  details to devI; the process and merits of Kailāśeśvaraliṅga Pradoṣa Pūjā કૈલાશેશ્વરલિઙ્ગ પ્રદોષ પૂજા.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય)  has several descriptions about Mount Kailāsa કૈલાસ શૈલ  and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

---

*Kailaseshvarapradoshapujavarnanam 3*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*